# मित्रक! आयातु।

संस्कृतभाषायां काव्यानि बहूनि सन्ति। तासु बालानां चित्ताकर्षिकाः कविताः अपि वर्तन्ते। तालानुसारं कवितालपनं सर्वे छात्राः इच्छन्ति। छात्राणां मनोरञ्जनार्थं पाठपुस्तके काचित् कविता समायोजिता। सहजीविस्नेहवर्धनाय पाठोऽयं साहाय्यकः भवति। इयं कविता कल्लाषि कृष्णन्कुट्टिमहोदयेन रचिता भवति।

| | |
|---|---|
| **पाठस्य नाम** | मित्रक! आयातु। |
| **आशयः** | सहजीविस्नेहः |
| **उद्देश्यम्** | सहजीविभिः सह स्नेहः, तैः सह जीवनं च प्रत्यभिजानाति। कवितारचना, पदानां चयनं च। |
| **पठननैपुणी** | आलपनम्। रचनानैपुणी। |
| **कालांशः -** | ६ |

आधारग्रन्थसूची - पुस्तकानि प्रसाधकः

१. शिशुसंस्कृतम्
२. गेयसंस्कृतम्
३. गीतसंस्कृतम्
} अक्षरम्, गिरिनगरम् बंगलूरु, ५६००८५.

४. बालगीतानि श्री अरविन्दाश्रमः।

| आशयाः / धारणाः / व्यवहाररूपाणि | पठनप्रवर्तनानि / पठनतन्त्राणि | पठनाधिगमाः |
|---|---|---|
| गीतम्। | गीतस्य आलपनं करोति। | तालभावसमन्वितं गीतम् आलपति। |
| बालगीतानाम् | गीतपूरणं कवितारचना च। | सूचनानुसारं गीतं रचयति। |
| आलपननैपुणी। | | विषयानुसारं गीतं रचयति। |
| पदपरिचयः। | पदचयनम्। | गीतं पठित्वा क्रियापदानां |
| क्रियापदानाम् अवगमनम्। | लोट्रूपाणां चयनम्। | लोट्रूपाणि चिनोति। |
| कवितारचनातात्पर्यं। | कवितां रचयति। | कवितारचनासामर्थ्यम् |
| बालकवितासञ्चयनतात्पर्यम्। | कवितासमाहरणम् | कविताः समाहरति। |

**आख्यानम्**

अध्यापिका कक्ष्यां प्रविश्य ग्रामीणगीतानि जानन्ति वा? इति पृच्छति। छात्रान् तादृशगीतानाम् आलपनाय प्रेरयति। ते मातृभाषायाम् अपि आलपन्तु। अनेन कक्ष्यायां गीतमयं वातावरणं सिध्यति। संस्कृते एतादृशानि ग्रामीणगीतानि जानन्ति वा? इति अध्यापिका पृच्छति। तादृशम् एकं सुन्दरगीतम् अस्माकं पाठपुस्तके अस्ति। तत् पश्यामः।

**प्रवर्तनम् - १**

**कवितालपनम्।**

**उद्देश्यम्** - कवितालापन - बालगीतालपननैपुणी।

**प्रक्रिया**

छात्रान् पाठभागस्थानां चित्राणां निरीक्षणाय निर्दिशति। चित्रे बालिका किं करोति इति पृच्छतु। बालिका कोकिलं पश्यति, गीतं गायति, इत्यादीनि उत्तराणि छात्राणां पक्षतः आगच्छन्ति। एतस्मिन् समये अध्यापिका छात्राणाम् अभिप्रायान् क्रोडीकरोतु। अनन्तरं पाठं दृष्ट्वा गीतस्य पठनाय वैयक्तिकप्रवर्तनं ददातु। तदानीं यत्र छात्राणां संशयः आगच्छति तत्र संशयनिवारणचर्चायै छात्रान् प्रेरयतु। केचन छात्राः तादृशान् लघुसंशयान् दूरीकर्तुं प्रभवन्ति। केषुचित् स्थानेषु अध्यापिकायाः साहाय्यम् आवश्यकं भवत्येव। एकेन तालेन गीतं पूर्णतया आलपितुं छात्राः यतन्ताम्। अभ्यासाय प्रेरयतु। अनन्तरं वैयक्तिकदृष्ट्या कवितालपनाय अवसरं ददातु। तदानीं छात्राः सतालं कवितालपनाय तात्पर्यं प्रकटयन्ति कुर्वन्ति च।

**मूल्यनिर्णयसूचिकाः**

उचिततालेन आलपनम्।

अक्षरस्फुटता।

आशयावबोधः।

**प्रवर्तनम् - २**

**कवितापरिवर्तनम्।**

**उद्देश्यम्** - विषयानुसारं सूचनानुसारं च गीतानि रचयति।

**प्रक्रिया**

छात्रान् सङ्घान् करोतु। पाठभागं पठित्वा कोकिलस्य स्थाने अन्येषां प्राणिनां नामानि संयोज्य कवितायाः परिवर्तनं कुर्वन्तु छात्राः।

यथा - प्रातः काले मामकभवनं

————————आयातु।

————————आयातु।

प्रतिदिनमस्मिन् कदलीपत्रे

———————— उपविशतु।

———————— उपविशतु। ( चातक, कपोत, चिक्रोड )

**मूल्यनिर्णयसूचिके**

उचितप्रयोगेन कवितां लिखति।

आशयपूर्णतया कवितालेखनं करोति।

**प्रवर्तनम् - ३**

**बालकवितारचना**

**उद्देश्यम्** - आशयपूर्णतया विषयावबोधनेन च कवितां रचयति।

**प्रक्रिया**

अध्यापिका कानिचन नामपदानि क्रियापदानि च कक्ष्यायाम् अवतारयति। अनन्तरं नामपदानां क्रियापदानां च लेखनाय छात्रान् निर्दिशति। लिखितानि पदानि छात्राः कक्ष्यायाम् अवतारयन्तु। अवतारणसमये अध्यापिका श्यामफलके तानि लिखतु। ततः पदानि उपयुज्य वाक्यलेखनाय निर्दिशतु। लिखितानि वाक्यानि छात्राः अवतारयन्तु। अवतारणसमये तान्यपि श्यामफलके लिखतु।

उदा -

| | नामपदानि | क्रियापदानि |
|---|---|---|
| | काकः | क्रीडति। |
| | कोकिलः | पतति। |
| | बालः | भषति। |
| | शुनकः | लिखति। |
| | पत्रम् | गायति। |
| | बालिका | रटति। |

यथा -

काकः रटति।

शुनकः भषति।

बालः लिखति।

वाक्यलेखनानन्तरं प्रकृतिदृश्यान्यधिकृत्य लघुवाक्यानां कथनाय प्रेरयति। अध्यापिका छात्राणां वर्णनानुसारं वाक्यानि क्रोडीकृत्य श्यामफलके एकां लघुखण्डिकां लिखति। खण्डिकातः उचितपदानि स्वीकृत्य लघुकवितारचनायै प्रेरयतु। कवितालेखनानन्तरं सङ्घे स्थित्वा उचिततालानुसारम् आलपनाय निर्दिशति।

## उद्यानम्

अस्माकं गृहस्याङ्कणे मनोहरमुद्यानमस्ति। उद्याने विविधानि पुष्पाणि सन्ति। मल्लिका, मन्दारं, सूर्यकान्तिः, पाटलम्, सेवन्तिका इत्यादीनि पुष्पाणि अतीव चारुतया शोभन्ते। कर्णिकारपुष्पाणि सुवर्णशोभया विलसन्ति। उद्याने औषधसस्यानि सन्ति। उद्याने सुगन्धपूरितः आरोग्यदायकः वातः वाति।

'मल्लिका मालती मन्दारमेवं
पाटलं चम्पकं सेवन्तिका।
पङ्कजं पारन्तीकर्णिकारौ
पुष्पाणि सर्वाणि सुन्दराणि।।'

## सूर्योदयः

कौसल्या सुप्रजा राम पूर्वा सन्ध्या प्रवर्तते।
उत्तिष्ठ नरशार्दूल कर्तव्यं दैवमाह्निकम्।।

प्रकाशपूर्णानि मन्दिराणि। कुक्कुटकोकिलकाकादीनां रवेण सङ्गीतसान्द्रा प्रकृतिः।

नवजीवनप्राप्तेः आनन्दमनुभूय विकसन्ति कोमलानि पुष्पाणि। नित्यकर्माणि कुर्वन्ति जनाः।

पूर्वस्यां दिशि स्वस्य अनुपमप्रकाशेन सम्पूर्णं प्रपञ्चं प्रकाशयन् उदयमानः सूर्यः। पश्यतु, प्रकृतेः मनोहारिताम्।।

'को को कूजति कुक्कुटः
मधुरं गायति कोकिलः।
शुभसमयोऽयं सूर्यस्य
मम मनः नित्यं नन्दयति।।

**वनम्।**

भूमेः अतिविशिष्टं वरदानं भवति वनम्। परिस्थितेः सुस्थितिः वनमाश्रित्यैव तिष्ठति। वृक्षलतादीनाम् आकरः खलु वनानि। लतासु नानावर्णकुसुमानि सन्ति। चन्दनम्, अश्वत्थः, अशोकः इत्यादयः वृक्षाः वने सन्ति। वृक्षलतादीनां सान्निध्येनैव प्राणवायुः, शुद्धं जलं च सुलभतया सिद्ध्यति। वनादेव नद्यः प्रस्रवन्ति, तासामपि परिरक्षा वनरक्षणेन भवेत्। जलसंरक्षणेन, वृक्षरोपणेन च भूमिं पालयामः।

**कविता**

भूमिमातरं रक्षयामः
प्रकृतिमातरं पूजयामः।
काननं सदा पालयामः
बालकतरून् रोपयामः।।
भूमिमातुः रक्षायै
जीवनं सदा सन्तु निर्मलम्।
वायुमण्डलं सन्तु पावनं
वृक्षरक्षणं धर्ममेव नो।।

**मूल्यनिर्णयसूचिकाः**

आशयपूर्णता।

विषयावबोधः।

तालबोधः:।

**प्रवर्तनम् - ४**

**संश्लिष्टपदचयनं पदच्छेदः च।**

**उद्देश्यम्** - संश्लिष्टपदपरिचयः, पदच्छेदज्ञानं च ।

**प्रक्रिया**

छात्रान् सङ्घान् करोतु। 'मित्रक आयातु' इति कवितां पठित्वा संश्लिष्टपदानि चित्वा पदच्छेदं कृत्वा लेखनाय निर्दिशतु। लिखितानि कक्ष्यायाम् अवतारयन्तु। अध्यापिका चार्ट्पत्रे लिखतु।

प्रतिदिनमस्मिन् - प्रतिदिनम् + अस्मिन्।

विस्मयमनुभवतु - विस्मयम् + अनुभवतु।

नवनवसूनैर्विलसितभूमेर्लावण्यम् - नवनवसूनैः + विलसितभूमेः + लावण्यम्।

कौतुकमुपयातु - कौतुकम् + उपयातु।

गीतकमालपतु - गीतकम् + आलपतु।

**प्रवर्तनम् ५**

**आलपतु, आयातु इत्यादि लोट्रूपाणां चयनं लेखनं च।**

**उद्देश्यम्** - लोट्रूपाणि अधिकृत्य ज्ञानम्।

**प्रक्रिया**

अध्यापिका छात्रेषु एकम् आह्वयति। "बाल रमेश, त्वम् आगच्छ" इति। एवं छात्राणां समीपं प्रश्नः प्रष्टव्यः। "रमेशः किं करोति?" तदानीं छात्राः वदेयुः। "रमेशः गच्छति"। कदाचित् उत्तरकथने अध्यापिकायाः साहाय्यम् आवश्यकं भवेत्। एवं द्वित्राणि उदाहरणानि वदन्तु।

यथा-

| | |
|---|---|
| पठतु | पठति |
| लिखतु | लिखति |
| चिन्तयतु | चिन्तयति |
| हसतु | हसति |

एतानि पदानि श्यामफलके लिखतु। अनन्तरम् एतादृशानि पदानि अस्माकं पाठे सन्ति वा इति प्रश्नं पृच्छतु। तदानीं छात्राः कवितां दृष्ट्वा उदाहरणानि वक्तुम् आरभन्ते। तानि पुस्तके लिखन्ति छात्राः।अस्मिन् पाठे उपयुक्तानि क्रियापदानि परस्मैपदिनः सन्ति। 'स्वदताम्' इति क्रियापदम् आत्मनेपदं भवति।

यथा - 'स्वदते स्वदेते स्वदन्ते' इति।

अर्थावबोधदृष्ट्या कवितायां 'स्वदताम्' इत्यस्य स्थाने पिबतु इति योजयतु, तत् सरलं भवेत् च। यथा अन्यत्र -

'पिबत भागवतं रसमालयं
मुहुरहो रसिका भुवि भावुकाः'। (ध्यानश्लोकः, भागवतपुराणम्)

तथा -

प्रीतिस्निग्धैर्जनपदवधूलोचनैः पीयमानः।( मेघदूतम् )

**मूल्यनिर्णयसूचिकाः**

उचितपदसमाहरणम्।

अवतारणम्।

क्रियापदग्रहणम्।

**प्रवर्तनम् - ६**

**कुतूहलवार्ताः।**

**उद्देश्यम् -** उचितपदज्ञानेन आशयावबोधः।

**प्रक्रिया**

अध्यापिका काश्चन कुतूहलवार्ताः सञ्चित्य कक्ष्यायाम् अवतारयतु।

यथा -

काचन अजा बालशुनकं क्षीरं यच्छति।

शुनकः मार्जारः च एकस्मिन् पञ्चरे निद्रां कुरुतः।

मार्जारः शुकः च एकीभूय एकस्मात् पात्राद् अन्नं खादतः।

शुनकः कुक्कुटशाबकान् परिपालयति।

सहजीविस्नेहम् आधारीकृत्य कक्ष्यायां चर्चां प्रचालयतु। अनन्तरं पाठपुस्तके दत्ते चित्रे किं किम् अस्ति इति कथनाय निर्दिशतु। छात्रैः कथितानि पदानि अध्यापिका श्यामफलके लिखतु।

**मूल्यनिर्णयसूचिकाः**

उचितपदसमाहरणम्।

आशयावबोधः।

अवतारणम्।

**अनुबन्धप्रवर्तनानि।**

**१. समानार्थकपदचयनम्।**

**उद्देश्यम् -** उचितपदज्ञानेन आशयावबोधः।

**प्रक्रिया**

'मित्रक! आयातु' इति पाठभागस्य सस्वरवाचनाय प्रेरयतु। अनन्तरम् अध्यापिका अधः प्रदत्तानि पदानि चार्ट्पत्रे विलिख्य प्रदर्शयतु। छात्राः पाठं पठित्वा पदानां समानार्थकपदानि पाठभागात् चित्वा लिखन्तु, अवतारयन्तु।

| पदानि | समानार्थकपदानि |
|---|---|
| पिकः | कोकिलः |
| आयातु | समायातु |
| दिने दिने | प्रतिदिनम् |
| पुष्पम् | सूनम् |
| सौन्दर्यं | लावण्यम् |
| शब्दः | निनदः |

**मूल्यनिर्णयसूचिकाः -**

उचितपदसमाहरणम्।

अर्थज्ञानम्।

अवतारणम्।

**२. उचितानि पदानि उपयुज्य रिक्तस्थानानि पूरयत -**

**उद्देश्यम्** - उचितपदज्ञानेन आशयावबोधः।

**प्रक्रिया**

अध्यापिका छात्रान् सङ्घान् करोतु। ततः श्यामफलके सम्भाषणांशं लिखतु। मञ्जूषातः पदानि स्वीकृत्य रिक्तस्थानानां पूरणाय निर्दिशतु।

रमेशः - राधे ——— गच्छति?

राधा - ————— पठितुं गच्छामि।

रमेशः - ———— सङ्गीतं पठति।

राधा - आगामिनि संस्कृतोत्सवे गानालपनस्पर्धायां ——— स्वीकर्तुम् इच्छामि।

रमेशः - अतीते वर्षे ——— अपि स्पर्धायां भागं स्वीकृतवान्।

राधा - गानं ———— लब्धम्।

रमेशः - मम ———— पाठपुस्तकात् लब्धम्।

(कुतः, अहम्, सोदर्याः, कुत्र, किमर्थं, सङ्गीतं, भागम्)

**मूल्यनिर्णयसूचिकाः**

उचितपदसमाहरणम्।

आशयावबोधः।

अवतारणम्।

## चटक चटक

चटक चटक रे चटक
चिब् चिब् कूजसि त्वं विहग
नीडे निवससि सुखेन डयसे
खादसि फलानि मधुराणि
विहरसि विमले विपुले गगने
नास्ति जनः खलु वारयिता।।
मातापितराविह मम न स्तः
एकाकी खलु खिन्नोऽहम्
एहि समीपं चिब् चिब् मित्र
ददामि तुभ्यं बहुधान्यम्।।
चणकं स्वीकुरु पिब रे नीरं
त्वं पुनरपि रट चिब् चिब् चिब्
तोषय मां कुरु मधुरालापम्
पाठय मामपि तव भाषाम्।।

## एहि एहि चन्दिर

एहि एहि चन्दिर
श्वेतकिरणसुन्दर।
नीलगगनमन्दिर
सकलजनमनोहर।।
तारकेश गिरिगुहासु
किरणजालमातनु।
वितर सस्यतरुलतासु
रसविशेषमादरात्।।
मातरः प्रदर्शनेन
नन्दयन्ति बालकान्।
पक्षिणश्च तव करेण
तोषयन्ति शावकान्।।